स्वस्तिका वेदिका शुक्ला नन्द्यावर्त्तकलाञ्छिताः ॥
पद्मादिलक्षणोपेताः शिलाः सर्व्वार्थसिद्धिदाः ।
तथा गोवाजिपादाङ्काः शिला धन्याः सुखावहाः ॥
क्रव्यादुरगपादाङ्का न शस्ताः पक्षिणस्तथा ।
हिङ्गुला दिग्विहीनाश्च दीर्घह्रस्वाः क्षतान्विताः ॥
विवर्णाः स्फुटिता भग्नाः संख्याण्या लक्षणच्युताः ।
प्रशस्तपाणिरूपाङ्काः प्रशस्तद्रव्यलाञ्छिताः ॥
यथोक्तलक्षणोपेताः शिला नित्यहितावहाः ॥”
अथ इष्टकालक्षणम् । तत्रैव ।
“इष्टकानां समासेन लक्षणं शृणु साम्प्रतम् ।
एकवर्णाः सुपक्वाश्च सुप्रमाणा मनोरमाः ॥
नन्दाद्याश्चेष्टकाः कार्य्याश्चतुरस्राः सुसंमिताः ।
अस्थ्यङ्गारान्विता नेष्टाः कृष्णवर्णाः सशर्कराः ॥
मन्दपक्वा विपक्वाश्च बहुदिन्याश्च वर्ज्जिताः ।
भग्नाश्च विषमा हीना वर्ज्जनीयाः प्रयत्नतः ॥”
हयशीर्षपञ्चरात्रे ।
“इष्टकानां प्रमाणञ्च लक्षणं साम्प्रतं शृणु ।
सुतला लक्षणोपेता द्वादशाङ्गुलसम्मिताः ॥
सुविस्तारविभागेन नैपुण्येन च सम्मिताः ।
सुपक्वाः सुप्रमाणास्ता एकवर्णा मनोहराः ।
विमला इष्टकाः कार्य्याश्चतुरस्राः सुसम्मिताः ।
छिन्नकर्णाश्चाप्रशस्ताः पाणिपादविवर्ज्जिताः ॥
सशर्कराः कृष्णवर्णा अस्थ्यङ्गारचिताश्च याः ।
विवर्णा मन्दगन्धाश्च याः पीनाः पिण्डिकाश्च याः ॥
हीनाश्च विषमा भग्ना जर्ज्जराश्च विवर्ज्जिताः ॥”
अथ शिलादिन्यासव्यवस्था । मात्स्ये ।
“शिलान्यासस्तु कर्त्तव्यः प्रासादे तु शिलामये ।
इष्टकानान्तु विन्यासः प्रासादे चेष्टकामये ॥
शैलजे शैलजः पीठ ऐष्टिके ऐष्टिकः स्मृतः ।
शिलान्यासादिको भद्रे मूलपादो विधीयते ॥”
हयशीर्षपञ्चरात्रे ।
“कर्त्तव्यश्चेष्टकान्यासः प्रासादे चेष्टकामये ।
शैले शिलानां विन्यासः कार्करे कर्करा न्यसेत् ॥
कृत्वा शिलादिन्यासे च प्राक्शिलाभ्यधिवासनम् ।
इष्टकानां प्रतिष्ठाञ्च गर्भाधानञ्च कारयेत् ॥
गुरवे दक्षिणां दत्त्वा पीठबन्धञ्च साधयेत् ।
स्वयं श्रीहयशीर्षेण प्रोक्तस्तत्तद्विधिः स्फुटम् ॥”
अथ पीठबन्धनम् । हयशीर्षे ।
“पीठबन्धं ततः कुर्य्यान्महाप्रासादमानतः ।
पीठोत्तमं चोच्छ्रयेण प्रासादस्यार्द्धमानतः ॥
पादहीनं मध्यमं स्यात् कन्यसं चार्द्धमानतः ।
उत्तमं वासुदेवस्य कुर्य्यात् पीठं विचक्षणः ॥
अथ प्रासादलक्षणानि । मात्स्ये ।
एवं वास्तुबलिं कृत्वा भजेत् षोड़शभागिकम् ।
तस्य मध्ये चतुर्भिस्तु भागैर्गर्भञ्च कारयेत् ॥
भागद्वादशकं तत्र भित्त्यर्थं परिकल्पयेत् ।
चतुर्भागेन भित्तीनामुच्छ्रायः स्यात् प्रमाणतः ॥
द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायात् प्रमाणतः ।
शिखरार्द्धस्य चार्द्धेन विधेया तु प्रदक्षिणा ॥
चतुर्दिक्षु तदा ज्ञेयो निर्गमस्तु तथा बुधैः ।
गर्भसूत्रद्वयं भागो विस्तारो मण्डपस्य तु ॥
आयतः स्यात्त्रिभिर्भागैर्भद्रयुक्तः सुशोभनः ।
पञ्चभागेन संभज्य गर्भमानं विचक्षणः ॥
भागमेकं गृहीत्वा तु प्राग्ग्रीवं कल्पयेद्बुधः ।
गर्भसूत्रसमो भागादग्रतो मुखमण्डपः ।
एतत् सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम् ॥
किञ्च ।
मेरुमन्दरकैलासकुम्भसिंहमृगास्तथा ।
विमानच्छन्दकस्तद्वच्छ्रीवृक्षोऽथ मृगाधिपः ॥
वलभिच्छन्दकस्तद्वद्वर्त्तुलः सर्व्वभद्रकः ।
गजश्च नन्दनश्चैव नन्दिवर्द्धन एव च ॥
हंसो वृषः सुपर्णश्च पद्मकोऽथ समुद्रकः ।
प्रासादा नामतः प्रोक्ता विभागं शृणुत द्विजाः ॥
शतशृङ्गश्चतुर्द्वारो भूमिकाषोड़शोच्छ्रितः ।
नानाविचित्रशिखरो मेरुप्रासाद उच्यते ॥
मन्दरो द्वादशः प्रोक्तः कैलासो दशभूमिकः ।
विमानच्छन्दकस्तद्वदनेकशिखराननः ॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धनः ।
विंशाण्डकसमायुक्तो नन्दनः समुदाहृतः ॥
षोड़शाण्डकसंयुक्तो नानारूपसमन्वितः ।
अनेकशिखरस्तद्वत् सर्व्वतोभद्र उच्यते ॥
चन्द्रशालसमोपेतो विज्ञेयः पञ्चभूमिकः ।
वलभिच्छन्दकस्तद्वच्छुकनासात्रयान्वितः ॥
वृषस्योच्छ्रयतस्तुल्यो मण्डलश्चासिवर्ज्जितः ।
सिंहः सिंहगतिर्ज्ञेयो मृगो मृगसमस्तथा ॥
कुम्भः कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रयः ।
अङ्गुलीपुटसंस्थानपञ्चाण्डकविभूषितः ॥
षोड़शास्रः समन्तात्तु विज्ञेयः स समुद्रकः ।
पार्श्वयोश्चन्द्रशालस्य उच्छ्रायो भूमिकाद्वयम् ॥
षोड़शास्रः स विज्ञेयो विचित्रशिखरः शुभः ।
मृगराजस्तु विख्यातश्चन्द्रशालाविभूषितः ॥
प्राग्ग्रीवेण विशालेन भूमिकासु षड़ुन्नतः ।
अनेकचन्द्रशालस्तु गजः प्रासाद उच्यते ॥
पर्य्यन्तगहरालो वै गरुड़ो नाम नामतः ।
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालात्रयान्वितः ॥
भूमिकाषड़शीतिस्तु वाह्यतः सर्व्वतो भवेत् ।
तथान्यो गरुड़स्तद्वदुच्छ्रायाद्दशभूमिकः ॥
पद्मकः षोड़शास्रस्तु भूमिद्वयसमन्वितः ।
पद्मतुल्यप्रमाणेन श्रीवृक्षक इति स्मृतः ॥
पञ्चाण्डकस्त्रिभूमिस्तु गर्भे हस्तचतुष्टयम् ।
वृषो भवति नाम्ना यः प्रासादः सर्व्वकामिकः ॥
सप्ताष्टौ पञ्चकाश्चैव प्रासादा ये मयोदिताः ।
सिंहस्य ते समा ज्ञेया ये चान्ये तत्प्रमाणतः ॥
चन्द्रशालैः समोपेताः सर्व्वे प्राग्ग्रीवसंयुताः ।
ऐष्टका दारवाश्चैव शैला वा स्युः सतोरणाः ॥
मेरुः पञ्चाशद्धस्तः स्यात् मन्दरः पञ्चहीनकः ।
चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्विमानकः ॥
नन्दिवर्द्धनकस्तद्वद्द्वात्रिंशत् समुदाहृतः ।
त्रिंशता नन्दनः प्रोक्तः सर्व्वतोभद्रकस्तथा ॥
वर्त्तुलः पद्मकश्चैव त्रिंशद्धस्त उदाहृतः ।
मृगः सिंहश्च कुम्भश्च वलभिच्छन्दकस्तथा ॥
एते षोड़शहस्ताः स्युश्चत्वारो देववल्लभाः ।
श्रीवृक्षो मृगराजश्च समुद्रकगजौ तथा ॥
एते द्वादशहस्ताः स्युरेतेषां हंसकः समः ।
गरुड़ोऽष्टकरो ज्ञेयो वृषो दश उदाहृतः ॥
एवमेते प्रमाणेन कर्त्तव्याः शुभलक्षणाः ।
यक्षराक्षसनागानां मातृहस्तः प्रशस्यते ॥
तथा मेर्व्वादयः सप्त ज्येष्ठलिङ्गे सुखावहाः ।
श्रीवृक्षकादयश्चाष्टौ मध्यमस्य उदाहृताः ॥
तथा हंसादयः पञ्च कन्यसे शुभदा मताः ॥”
हयशीर्षपञ्चरात्रे ।
“प्रासादं संप्रवक्ष्यामि सर्व्वसाधारणं शृणु ।
चतुरस्रीकृतं क्षेत्रं भवेत् षोड़शधा पुनः ॥
मध्ये तस्य चतुर्भिस्तु कुर्य्यादायंसमन्वितम् ।
द्वादशैव तु भागानि भित्त्यर्थं परिकल्पयेत् ॥
जङ्घोच्छ्रायन्तु कुर्व्वीत चतुर्भागेन चायतम् ।
जङ्घयोर्द्विगुणोच्छ्रायं मञ्जर्य्याः कल्पयेद्बुधः ॥
चतुर्भागेन मञ्जर्य्याः कार्य्या सम्यक् प्रदक्षिणा ।
तन्मानं निर्गमं कार्य्यमुभयोः पार्श्वयोः समम् ॥
शिखरेण समं कार्य्यमग्रे जगति विस्तरम् ।
त्रिगुणेनापि कर्त्तव्यं यथाशोभानुरूपतः ॥
विस्तरं मण्डपस्याग्रे गर्भसूत्रद्वयेन तु ।
दैर्घ्यात् पादाधिकं कुर्य्यान्मध्ये स्तम्भैर्व्विभूषितम् ॥
प्रासादगर्भमानं वा कुर्व्वीत मुखमण्डपम् ।
एकाशीतिपदैर्वास्तुं यष्ट्वा मण्डपमारभेत् ॥
शुकाघ्रद्वारि विन्यासे पादान्तस्थान् यजेत् सुरान् ।
तथा प्राकारविन्यासे यजेद्द्वात्रिंशदन्तगान् ॥
सर्व्वसाधारणञ्चैतत् प्रासादस्य तु लक्षणम् ।
मानेन प्रतिमाया वा प्रासादमपरं शृणु ॥
प्रतिमायाः प्रमाणेन कर्त्तव्या पिण्डिका शुभा ।
गर्भस्तु पिण्डिकार्द्धेन गर्भमानास्तु भित्तयः ॥
भित्तेरायाममानेन उच्छ्रायन्तु प्रकल्पयेत् ।
भित्त्युच्छ्रायात्तु द्विगुणं शिखरं कल्पयेद्गुरु ! ।
शिखरस्य तु तुर्य्येण भ्रमणं परिकल्पयेत् ॥
शिखरस्य चतुर्थेन अग्रतो मुखमण्डपम् ।
अष्टमांशेन गर्भस्य रथकानान्तु निर्गमः ॥
परिधेर्गुणभागेन रथकांस्तत्र कल्पयेत् ।
तत्तृतीयेन वा कुर्य्याद्रथकानान्तु निर्गमम् ॥
वामत्रयं स्थापनीयं रथकत्रितये सदा ।
शिखरार्थञ्च सूत्राणि चत्वारि विनिपातयेत् ॥
शिखरस्यार्द्धभागस्थं सिंहं तत्र च कारयेत् ।
शुकनासां स्थिरीकृत्य मध्यसन्धौ विवर्ज्जयेत् ।
अपरे च तथा पार्श्वे तद्वत् सूत्रं निधापयेत् ॥
तदर्द्धन्तु भवेद्वंशः कण्ठे ह्यामलसारवान् ।
स्कन्धभग्नन्तु कर्त्तव्यं विकरालं तथैव च ।
ऊर्द्धन्तु वेदिकामानात् कलसं परिकल्पयेत् ॥”
किञ्च ।
“गलन्तं तथा कुर्य्यादुपरिष्टाच्चतुर्गुणम्